श्री मृत्युंजय स्तोत्रं

श्री मृत्युंजय स्तोत्रं

नंदिकेश्वर उवाच |
कैलासस्योत्तरे शृंगे शुद्धस्फटिकसन्निभे |
तमोगुणविहीने तु जरामृत्युविवर्जिते || 1 ||

सर्वतीर्थास्पदाधारे सर्वज्ञानकृतालये |
कृतांजलिपुटो ब्रह्मा ध्यानासीनं सदाशिवं || 2 ||

पप्रच्छ प्रणतो भूत्वा जानुभ्यामवनिं गतः |
सर्वार्थसंपदाधारो ब्रह्मा लोकपितामहः || 3 ||

ब्रह्मोवाच |
केनोपायेन देवेश चिरायुर्लोमशोऽभवत् |
तन्मे ब्रूहि महेशान लोकानां हितकाम्यया || 4 ||

श्रीसदाशिव उवाच |
शृणु ब्रह्मन् प्रवक्ष्यामि चिरायुर्मुनिसत्तमः |
संजातो कर्मणा येन व्याधिमृत्युविवर्जितः || 5 ||

तस्मिन्नेकार्णवे घोरे सलिलौघपरिप्लुते |
कृतांतभयनाशाय स्तुतो मृत्युंजयः शिवः || 6 ||

तस्य संकीर्तनान्नित्यं मर्त्यो मृत्युविवर्जितः |
त्वमेव कीर्तयन् ब्रह्मन् मृत्युं जेतुं न संशयः || 7 ||

लोमश उवाच |
देवाधिदेव देवेश सर्वप्राणभृतां वर |
प्राणिनामपि नाथस्त्वं मृत्युंजय नमोऽस्तु ते || 8 ||

देहिनां जीवभूतोऽसि जीवो जीवस्य कारणं |
जगतां रक्षकस्त्वं वै मृत्युंजय नमोऽस्तु ते || 9 ||

हेमाद्रिशिखराकार सुधावीचिमनोहर |
पुंडरीक परं ज्योतिर्मुत्युंजय नमोऽस्तु ते || 10 ||

ध्यानाधार महाज्ञान सर्वज्ञानैककारण |
परित्रातासि लोकानां मृत्युंजय नमोऽस्तु ते || 11 ||

निहता येन कालेन सदेवासुरमानुषाः |
गंधर्वाप्सरसश्चैव सिद्धविद्याधरास्तथा || 12 ||

साध्याश्च वसवो रुद्रास्तथाश्विनिसुतावुभौ |
मरुतश्च दिशो नागाः स्थावरा जंगमास्तथा || 13 ||

अनंगेन मनोजेन पुष्पचापेन केवलं |
जितः सोऽपि त्वया ध्यानान्मृत्युंजय नमोऽस्तु ते || 14 ||

ये ध्यायंति परां मूर्तिं पूजयंत्यमराधिप |
न ते मृत्युवशं यांति मृत्युंजय नमोऽस्तु ते || 15 ||

त्वमोंकारोऽसि वेदानां देवानां च सदाशिवः |
आधारशक्तिः शक्तीनां मृत्युंजय नमोऽस्तु ते || 16 ||

स्थावरे जंगमे वापि यावत्तिष्ठति मेदिनी |
जीवत्वित्याह लोकोऽयं मृत्युंजय नमोऽस्तु ते || 17 ||

सोमसूर्याग्निमध्यस्थ व्योमव्यापिन् सदाशिवः |
कालत्रय महाकाल मृत्युंजय नमोऽस्तु ते || 18 ||

प्रबुद्धे चाप्रबुद्धे च त्वमेव सृजसे जगत् |
सृष्टिरूपेण देवेश मृत्युंजय नमोऽस्तु ते || 19 ||

व्योम्नि त्वं व्योमरूपोऽसि तेजः सर्वत्र तेजसि |
प्राणिनां ज्ञानरूपोऽसि मृत्युंजय नमोऽस्तु ते || 20 ||

जगज्जीवो जगत्प्राणः स्रष्टा त्वं जगतः प्रभुः |
कारणं सर्वतीर्थानां मृत्युंजय नमोऽस्तु ते || 21 ||

नेता त्वमिंद्रियाणां च सर्वज्ञानप्रबोधकः |
सांख्ययोगश्च हंसश्च मृत्युंजय नमोऽस्तु ते || 22 ||

रूपातीतः सुरूपश्च पिंडस्था पदमेव च |
चतुर्युगकलाधार मृत्युंजय नमोऽस्तु ते || 23 ||

रेचके वह्निरूपोऽसि सोमरूपोऽसि पूरके |
कुंभके शिवरूपोऽसि मृत्युंजय नमोऽस्तु ते || 24 ||

क्षयं करोऽसि पापानां पुण्यानामपि वर्धसं |
हेतुस्त्वं श्रेयसां नित्यं मृत्युंजय नमोऽस्तु ते || 25 ||

सर्वमायाकलातीत सर्वेंद्रियपरावर |
सर्वेंद्रियकलाधीश मृत्युंजय नमोऽस्तु ते || 26 ||

रूपं गंधो रसः स्पर्शः शब्दः संस्कार एव च |
त्वत्तः प्रकाश एतेषां मृत्युंजय नमोऽस्तु ते || 27 ||

चतुर्विधानां सृष्टीनां हेतुस्त्वं कारणेश्वर |
भावाभावपरिच्छिन्न मृत्युंजय नमोऽस्तु ते || 28 ||

त्वमेको निष्कलो लोके सकलं भुवनत्रयं |
अतिसूक्ष्मातिरूपस्त्वं मृत्युंजय नमोऽस्तु ते || 29 ||

त्वं प्रबोधस्त्वमाधारस्त्वद्बीजं भुवनत्रयं |
सत्त्वं रजस्तमस्त्वं हि मृत्युंजय नमोऽस्तु ते || 30 ||

त्वं सोमस्त्वं दिनेशश्च त्वमात्मा प्रकृतेः परः |
अष्टत्रिंशत्कलानाथ मृत्युंजय नमोऽस्तु ते || 31 ||

सर्वेंद्रियाणामाधारः सर्वभूतगणाश्रयः |
सर्वज्ञानमयानंत मृत्युंजय नमोऽस्तु ते || 32 ||

त्वमात्मा सर्वभूतानां गुणानां त्वमधीश्वरः |
सर्वानंदमयाधार मृत्युंजय नमोऽस्तु ते || 33 ||

त्वं यज्ञः सर्वयज्ञानां त्वं बुद्धिर्बोधलक्षणा |
शब्दब्रह्म त्वमोंकारो मृत्युंजय नमोऽस्तु ते || 34 ||

श्रीसदाशिव उवाच |
एवं संकीर्तयेद्यस्तु शुचिस्तद्गतमानसः |
भक्त्या शृणोति यो ब्रह्मन् न स मृत्युवशो भवेत् || 35 ||

न च मृत्युभयं तस्य प्राप्तकालं च लंघयेत् |
अपमृत्युभयं तस्य प्रणश्यति न संशयः || 36 ||

व्याधयो नोपपद्यंते नोपसर्गभयं भवेत् |
प्रत्यासन्नांतरे काले शतैकावर्तने कृते || 37 ||

मृत्युर्न जायते तस्य रोगान्मुंचति निश्चितं |
पंचम्यां वा दशम्यां वा पौर्णमास्यामथापि वा || 38 ||

शतमावर्तयेद्यस्तु शतवर्षं स जीवति |
तेजस्वी बलसंपन्नो लभते श्रियमुत्तमां || 39 ||

त्रिविधं नाशयेत्पापं मनोवाक्कायसंभवं |
अभिचाराणि कर्माणि कर्माण्याथर्वणानि च |
क्षीयंते नात्र संदेहो दुःस्वप्नं च विनश्यति || 40 ||

इदं रहस्यं परमं देवदेवस्य शूलिनः |
दुःखप्रणाशनं पुण्यं सर्वविघ्नविनाशनं || 41 ||

इति श्रीशिवब्रह्मसंवादे श्रीमृत्युंजय स्तोत्रं |